योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०३६

< योगवासिष्ठः | प्रकरणम् ३ (उत्पत्तिप्रकरणम्)

षट्त्रिंशः सर्गः ३६

श्रीवसिष्ठ उवाच ।

अथ श्रृङ्गोपमानेषु स्थितेषु शरराशिषु ।

सर्वभीरुषु भग्नेषु विद्रुतेषु दिशो दश ।। १

मातङ्गशवशैलेषु विश्रान्ताम्बुदपङ्कतिषु ।

यक्षरक्षःपिशाचेषु क्रीडत्सु रुधिरार्णवे ।। २

महतां धर्मनिष्ठानां शीलौजःसत्त्वशालिनाम् ।

शुद्धानां कुलपद्मानां वीराणामनिवर्तिनाम् ।। ३

द्वन्द्वयुद्धानि जातानि मेघानामिव गर्जताम् ।

मिथोनिगरणोत्कानि मिलन्त्यापगपूरवत् ।। ४

पञ्जरः पञ्जरेणेव गजौघेन गजोच्चयः ।

सवनः सवनेनाद्रिरद्रिणेवामिलद्बलात् ।। ५

अश्वौघो मिलदश्वानां वृन्देनाराविरंहसा ।

तरङ्गौघेन घोषेण तरङ्गौघ इवार्णवे ।। ६

नरानीकं नरानीकः समायुधमयोधयत् ।

वेण्वोघमिव वेण्वोघो मरुल्लोलो मरुद्बलम् ।। ७

रथौघश्च रथौघेन निष्पिपेषाखिलं वपुः ।

नगरं नगरेणेव दैवेनोड्डीनमासुरम् ।। ८

सरच्छरभरासाररचितापूर्ववारिदम् ।

युयुधे स्थगिताकाशा धनुर्धरपताकिनी ।। ९

विषमायुधयुद्धेषु योद्धारः पेलवाशयाः ।

यदा युक्त्या पलायन्ते रणकल्पानले तदा ।। १०

मिलिताश्वक्रिणश्चक्रैर्धनुधरिर्धनुर्धराः ।

खड्गिभिः खड्गयोद्धारो भुशुण्डीभिर्भुशुण्डयः ।। ११

मुसलैर्मुसलोदाराः कुन्तिनः कुन्तिधारिभिः ।

ऋष्ट्यायुधा ऋष्टिधरैः प्रासिभिः प्रासपाणयः ।। १२

समुद्गरा मुद्गरिभिः सगदैर्विलसद्गदाः ।

शाक्तिकैः शक्तियोद्धारः शूलैः शूलविशारदाः ।। १३

प्रासासनविदः प्रासैः परशूक्ताः परश्वधैः ।

लकुटोद्यैर्लकुटिनश्चोपलैरुपलायुधाः ।। १४

पाशिभिः पाशधारिण्यः शङ्कुभिः शङ्कुधारिणः ।

क्षुरिकाभिस्तु क्षुरिका भिन्दिपालैश्च तद्गताः ।। १५

वज्रमुष्टिधरा वज्रैरङ्कुशैरङ्कुशोद्धताः ।

हलैर्हलनिकाषज्ञास्त्रिशूलैश्च त्रिशूलिनः ।। १६

श्रृङ्खलाजालिनो जालैः श्रृङ्खलैरलिकोमलैः ।

क्षुभिताकल्पविक्षुब्धसागरोर्मिघटा इव ।। १७

क्षुब्धचक्रदलावर्तः शरसीकरमारुतः ।

प्रभ्रमद्धेतिमकरो व्योमैकार्णव आबभौ ।। १८

उत्फुल्लायुधकल्लोलशिराकुलजलेचरः ।

रोदोरन्ध्रसमुद्रोऽसौ बभूवामरदुस्तरः ।। १९

दिव्याष्टकजनानीकं पक्षद्वयतया तया ।

अर्धेनार्धेन कुपितं भूपालाभ्यां तथा स्थितम् ।। २०

मध्यदेशादिसंख्याने प्राग्दिभ्योऽभ्यागतानिमान् ।

लीलानाथस्य पद्मस्य पक्षे जनपदाञ्छृणु ।। २१

पूर्वस्यां कोसलाः काशिमागधा मिथिलोत्कलाः ।

मेखलाः कर्करा मुद्रास्तथा संग्रामशौण्डकाः ।। २२

मुख्या हिमा रुद्रमुख्यास्ताम्रलिप्तास्तथैव च ।

प्राग्ज्योतिषा वाजिमुखा अम्बष्ठाः पुरुषादकाः ।। २३

वर्णकोष्ठाः सविश्वोत्रा आममीनाशनास्तथा ।

व्याघ्रवक्राः किराताश्च सौवीरा एकपादकाः ।। २४

माल्यवान्नाम शैलोऽत्र शिविराञ्जन एव च ।

वृषलध्वजपद्माद्यास्तथोदयकरोगिरिः ।। २५

अथ प्राग्दक्षिणायां तु इमे विन्ध्यादिवासिनः ।

चेदयो वत्सदाशार्णा अङ्गवङ्गोपवङ्गकाः ।। २६

कलिङ्गपुण्ड्रजठरा विदर्भा मेखलास्तथा ।

शबराननवर्णाश्च कर्णात्रिपुरपूरकाः ।। २७

कण्टकस्थलनामानः पृथग्दीपककोमलाः ।

कर्णान्ध्राश्चौलिकाश्चैव तथा चार्मण्वता अपि ।। २८

काकका हेमकुड्याश्च तथा श्मश्रुधरा अपि ।

बलिग्रीवमहाग्रीवाः किष्किन्धा नालिकेरिणः ।। २९

अथ लीलापतेरस्य दक्षिणस्यामिमे नृपाः ।

विन्ध्योऽथ कुसुमापीडो महेन्द्रो दर्दुरस्तथा ।। ३०

मलयः सूर्यवांश्चैव गणा राज्यसमृद्धकाः ।

अवन्तीरिति विख्यातास्तथा शाम्बवतीति च ।। ३१

दशपूरकथाचक्रारेषिकातुरकच्छपाः ।

वनवासोपगिरयस्ते भद्रगिरयस्तथा ।। ३२

नागरा दण्डकाश्चैव गणराष्ट्रनृराष्ट्रकाः ।

साहा शैवार्ष्यमूकाश्च कर्कोटा वनविम्बलाः ।। ३३

पम्पानिवासिनश्चैव कैरकाः कर्कवीरकाः ।

स्वेरिका यासिकाश्चैव धर्मपत्तनपञ्जिकाः ।। ३४

काशिकास्तृष्णखल्लूला यादास्ते ताम्रपर्णकाः ।

गोनर्दाः कनकाश्चैव दीनपत्तनमामकाः ।। ३५

ताम्रीका दम्भराकीर्णाः सहकौरणकास्तथा ।

वैतुण्डकास्तुम्बवनालाजिनद्वीपकर्णिकाः ।। ३६

कर्णिकाभाश्च शिवयः कौङ्कणाश्चित्रकूटकाः ।
कर्णाटमण्टवटका महाकटकिकास्तथा ।। ३७
आन्ध्राश्च कोलगिरयश्चावन्तिकविचेरिकाः ।
चण्डायत्ता देवनकाः क्रौञ्चा वाहास्तथैव च ।। ३८
शिलाक्षारोदभोनन्दमर्दना मलयाभिधाः ।
ते चित्रकूटशिखरा लङ्कारक्षोगणाः स्मृताः ।। ३९
अथ प्रत्यग्दक्षिणस्यां महाराज्यसुराष्ट्रकाः ।
सिन्धुसौवीरशूद्राख्या आभीरा द्रविडास्तथा ।। ४०
कीकटाः सिद्धखण्डाख्यास्तथा कालिरुहा अपि ।
अत्र हेमगिरिः शैलस्तथा रैवतको गिरिः ।। ४१
जयकच्छो मयवरो यवनास्तत्र जन्तवः ।
बाह्लीका मार्गणावन्ता धूम्रास्तुम्बकनामकाः ।। ४२
तथा लाजगणाश्चैव तथात्र गिरिवासिनः ।
ततोऽब्धितोकनियुता एते लीलापतेर्जनाः ।। ४३
अथ तत्प्रतिपक्षस्थानिमाञ्जनपदाञ्श्रृणु ।
पश्चिमायां दिशि प्रौढा इमे तावन्महाद्रयः ।। ४४
मणिमान्नाम शैलेन्द्रः कुरार्पणगिरिस्तथा ।
वनोऽर्कहो मेघभवश्चक्रवानस्तपर्वतः ।। ४५
जनाः पञ्चजना नाम काशब्रह्मचयान्तकाः ।
तथैव भारक्षतथाः पारकाः शान्तिकास्तथा ।। ४६
शैव्यारमरकायाच्छा गुहुत्वा नियमास्तथा ।
हैहयाः सुह्मगायाश्च ताजिका हूणकास्तथा ।। ४७
पार्श्वकतकयोः कर्का गिरिपर्णावमास्तथा ।
संत्यक्तधर्ममर्यादास्ते वर्णा म्लेच्छजातयः ।। ४८
ततोऽजनपदा भूमिर्योजनानां शतद्वयम् ।
ततो महेन्द्रशिखरी मुक्तामणिमयावनिः ।। ४९

युते महीधरशतैरथाश्वो नाम पर्वतः ।

ततो महार्णवो भीमः पारियात्रगिरिस्तटे ।। ५०

पश्चिमोत्तरदिग्भागे देशो गिरिमति स्थितः ।

तथा वेणुपतिश्चैव ततो नरपतिर्मही ।। ५१

तथा फल्गुणकाश्चैव माण्डव्यानेकनेत्रकाः ।

पुरुकुन्दाश्च पाराश्च भानुमण्डलभावनाः ।। ५२

वन्मिला नलिना दीर्घा दीर्घकेशाङ्गबाहवः ।

रङ्गाश्च स्तनिकाश्चान्या गुरुहाश्चलुहास्तथा ।। ५३

ततः स्त्रीराष्ट्रमतुलं गोवृषापत्यभोजनम् ।

अथोत्तरस्यां हिमवान्क्रौञ्चोऽथ मधुमान्गिरिः ।। ५४

कैलासो वसुमान्मेरुस्तत्पादेषु जना उभे ।

मद्रावारेवयौधेया मालवाः शूरसेनिकाः ।। ५५

राजन्याश्च तथा ज्ञेया अर्जुनातनयस्तथा ।

त्रिगर्त एकपात्क्षुद्रामबलास्वस्तवासिनः ।। ५६

अबलाः प्रखलाः शाकाः क्षेमधूर्तय एव च ।

दशधानागावसन्यदण्डाहन्यसनास्तथा ।। ५७

धानदाः सरकाश्चैव वाटधानास्तथैव च ।

अन्तरद्वीपगान्धारास्तथावन्तिसुरास्तथा ।। ५८

अथ तक्षशिला नाम ततो वीलवगोधनी ।

पुष्करावर्तदेशस्य यशोवतिमही ततः ।। ५९

ततो नाभिमतिर्भूमिस्तिक्षा कालवरास्तथा ।

काहकं नगरं चैव सुरभूतिपुरं तथा ।। ६०

तथैव रतिकादर्शा अन्तरादर्श एव च ।

ततः पिङ्गलपाण्डव्यं यामुने यातुधानकाः ।। ६१

मानवा नांगना हेमतालाः स्वस्वमुखास्तथा ।

हिमवान्वसुमान्क्रौञ्चकैलासावित्यगास्तथा ।। ६२

ततोऽजनपदा भूमिरशीतिशतयोजना ।

अथ प्रागुत्तरस्यां तु क्रमाज्जनपदाञ्छृणु ।। ६३

कालुता ब्रह्मपुत्राश्च कुणिदाः खदिनास्तथा ।

मालवा रन्ध्रराज्याश्च वना राष्ट्रास्तथैव च ।। ६४

केडवस्ताः सिंहपुत्रास्तथा वामनतां गताः ।

सावाकच्चापलवहाः कामिरा दरदास्तथा ।। ६५

अभिसासदजार्वाकाः पलोलकुविकौतुकाः ।

किरातायामुपाताश्च दीनाः स्वर्णमही ततः ।। ६६

देवस्थलोपवनभूस्तदनूदितश्री-

र्विश्वावसोस्तदनु मन्दिरमुत्तमं च ।

कैलासभूस्तदनु मञ्जुवनश्च शैलो

विद्याधरामरविमानसमानभूमिः ।। ६७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलो० जनपदवर्णनं नाम षटत्रिंशः सर्गः ।। ३६ ।।